Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बौद्धसूचिपत्र

भाग ४

श्री ५ को सरकार शि. मं. पुरातत्व विभाग

नेपाल राष्ट्रिय पुस्तकालयबाट प्रकाशित

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरातत्त्वप्रकाशनमाला: ४१

सूचिपत्र

भाग ४

अध्यक्ष नारायण प्रसाद शर्माको

अध्यक्षतामा

पं. देवीप्रसाद लंसाल द्वारा सम्पादित

श्री ५ को सरकार

शि० मं० पुरातत्व विभाग

नेपाल राष्ट्रिय पुस्तकालयबाट प्रकाशित

संवत् २०२४ श्रावण

मूल्य—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुस्तकालयको भनाइ

यस पुस्तकालयबाट संपादित तथा प्रकाशित प्रकाशनहरुको क्रममा यो एघारौं रै हस्तलिखित ग्रन्थहरुको वैज्ञानिक सूचिनिर्माणमा चौथो हो। हस्तलिखित ग्रन्थहरुको वैज्ञानिक सूचिपत्रको महत्व र उपादेयताका सम्बन्धमा सर्व प्रथम प्रकाशित बौद्ध दर्शनको सूचि तथा अन्य सूचिहरुमा नै उल्लेख गरि सकिएको छ।

पुस्तकालयका हस्तलिखित ग्रन्थहरुमा बौद्धतन्त्र सम्बन्धी पुस्तकहरुको निकै बाहुल्य भएको र यस सूचिमा ती सबै समावेश हुन नसकेका हुदा अवशिष्ट तन्त्र भाग अवदान, स्तोत्र आदिका साथ समावेश गरि आगामी सूचिमा प्रकाशित गरिने छ।

आजको वैज्ञानिक युगमा पनि हाम्रो देशमा तन्त्र शास्त्र र तान्त्रिकहरूको महत्व कम छैन यस दृष्टिबाट तन्त्र शास्त्रमा रुचि राख्ने पाठकहरु यस सूचिपत्र बाट लाभान्वित हुन सकेमा पुस्तकालयले आफ्नो परिश्रम सार्थक सम्झने छ।

अन्तमा यो सूचिपत्रको प्रकाशनका लागी काम गर्ने पुस्तकालयका सहयोगी कर्मचारी हरु र परिश्रम पूर्वक सम्पादन गर्ने पं देवीप्रसाद लंसाल, सहायक पं यज्ञानन्द गुभाजु विशेष धन्यवादका पात्र हुनु हुन्छ।

नारायण प्रशाद शर्मा
अध्यक्ष
नेपाल राष्ट्रिय पुस्तकालय

हरिहर भवन
ल. पु पुलचोक
श्रावण २४

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ बौद्धतन्त्रग्रन्थाः

अद्वयक्रमोपदेशः

क्रमाङ्कः ४५ विषयाङ्कः १

ग्रन्थकारः— कुद्दालपादः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १३ । आकारः १२×५ । ग्रन्थसंख्या १०८ । पत्रसंख्या ४४-४७ ।

आदिवाक्यम्—

नमो वज्रसत्वाय

प्रज्ञाग्र गर्भसंभूतं अचिन्त्यमद्वयं विभुं ।
प्रणम्य लिख्यते सम्यक् भद्रपाद क्रमागतं ॥
प्रज्ञोपाय महागुह्यं करुणा चिन्त्य लक्षणं ।
स्वयं उत्पद्यते ज्ञानं वाक्पथातीत गोचरम् ॥

अन्तिमवाक्यम्—

इति लिखितं विषल गुरुक्रमानन्तयोगम्वृहद्गुणाऽ शेषमन्त्रसद्भावमतञ्च संभूतं अचिंत्याद्वय भागस्तु उपपन्न क्रमोयोगमाप्नोयोनीति गर्भदेवतारुपम् ॥ आत्मनः स्मरणार्थमस्मज्जन जडसन्त बुद्धानां ॥ ॥ इत्यचिन्त्याद्वयक्रमोपदेशः समाप्तः ॥ ॥ कृतिरियं महामुद्रासिद्धि श्रीकुद्दालपादानामिति ॥

अद्वयसिद्धिः

क्रमाङ्कः ४५ विषयाङ्कः २

ग्रन्थकारः— — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५३ । आकारः १२×५ । ग्रन्थसंख्या ३५ । पत्रसंख्या १ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्-

नमः श्रीवज्रसत्वाय

प्रकृति प्रभास्वरंनाथं सर्वज्ञं त्रिभवोद्भवम् ।
प्रणम्य शिरशा वज्रमीप्सितार्थ फल : प्रदम् ॥

अन्तिमं पुष्पिका—

श्रीमदोडियान विनिर्गता महायोगपीठागता अखिल योगतन्त्र गर्भ श्रीलक्ष्मीमुख-कमलाद्विनिःसृता स्वाधिष्ठानक्रमोदया अद्वयसिद्धिर्नाम साधनोपयोगिका समाप्तेति ।

अपरिमितायुर्महायानसूत्रम्

क्रमाङ्कः २६७ विषयाङ्कः ३

ग्रन्थकार— -- । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १०×२३/४ । ग्रन्थसंख्या । पत्रसंख्या १४ । पूर्णम् ।

अभिधानोत्तरतन्त्रम्

क्रमाङ्कः ३३ विषयाङ्कः ४

ग्रन्थकारः— । नेपालीयंकागतम् । नेवारी लिपिः । पङ्क्तयोऽनियताः । आकारः १०×३ । ग्रन्थसंख्या ३५२४ । पत्रसंख्या १०७ ।

नमःश्री चक्रसम्वराय

पडेवै यत्र पर्यन्ते सर्वबुद्ध—— वितैः ।
क्रियते वज्रसत्वेन तमीडे धर्मधातुकम् ॥
श्रीमते वज्रडाकाय डाकिनी चक्रवर्त्तिनम् ।
पञ्चज्ञान त्रिकायाय त्राणाय जगतो नमः ॥
यावन्तो वज्रडाकिन्य छिन्न संकल्प वन्धनाः ।
लोककृत्य प्रवर्त्तन्य स्तावतीभ्यो नमस्सदा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं मया श्रुतमेकस्मिन्समये भगवान्सर्वतथागत वज्रक्रोध डाकडाकिनी गुय हृदयेषु विजहार ।

पुष्पिकावाक्यानि—

इति अभिधानोत्तरोत्तरे अवतारणे समयगुह्य रहस्य पटलः प्रथमः
अभिधानोत्तरे प्रार्थना पटलो द्वितीयः ।
अभिधानोत्तरे हृदयतत्त्वपरमार्थपटलस्तृतीयः ।
इति कायसम्वरविधि पटलः प्रथमः ।
महासुरत पद्मजाल सम्वर अभिधानोत्तर पटलो द्वितीयः ।
अभिधानोत्तरोत्तरेसंवरगुरुपालि पटल स्तृतीयः ।
इत्यभिधानोत्तरे समयसम्वर पटलश्चतुर्थः ।
इत्यभिधानोत्तरे पीठपर्क्रिम पटलः पञ्चमः ।
अभिधानोत्तरे सर्व अनवस्थित क्रमभेद विधानोनाम षष्ठः पटलः ।
इत्यभिधानोत्तरे मञ्जुवज्रविधि पटलः त्रिचक्रोल्लि सप्तमः ।
अभिधानोत्तरे पीठसिद्धि पटलोऽष्टमः ।
अभिधानोत्तरे योगिनीपीठ सिद्धिक्रम निमित्त निर्देशोनाम नवमः ।
अभिधानोत्तरोत्तरे कोशप्रस्ताव पीठ सम्प्रदाय पटलो दशमः ।
इत्यभिधानोत्तरे पीठादित योगिनी एकादशः पटल ।
अभिधानोत्तरोत्तरे श्रीहेरुकडाकिन्या वीरयोगिन्या भावनोत्पत्ति द्वादश.पटलः ।
इत्यभिधानोत्तरोत्तरे आदिकर्मिकयोग भावना पटल स्त्रयोदशमः ।
अभिधानोत्तरोत्तरे मध्येन्द्रिय भावनोपदेश पटलश्चतुर्दशः ।
इत्यभिधानोत्तरोत्तरे तीक्ष्णेन्द्रिय भावनोपदेश पटलः पञ्चदशः ।
अभिधानोत्तरोत्तरे चतुडाकिनी योगसम्वर विधिः पटलः षोडशः ।
इति अभिधानोत्तरे योगसम्वरविनय पटलः सप्तदशः ।
अभिधानोत्तरोत्तरे प्रत्यङ्गिरापटल अष्टादशः ।
इत्यभिधानोत्तरोत्तरेऽमृतसञ्जीविन्या सर्वकर्मकरीनाम भावनाम भावना पटल उनविंशतितमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिधानोत्तरे योगिनि गुह्य समय तत्वावतारण पट लो त्रिंशतितमः ।
अभिधानोत्तरोत्तरे कुलपटचक्रवर्ति सम्प्रदाय पटलः एकविंशतितमः ।
इति अभिधानोन्तरो-तरे कायवाक्चित्तपीठानुक्रम पटलो द्वाविंशतितमः ।
इत्यभिधानोत्तरोत्तरे समयोत्थापन बुद्धकापालोपचितस्त्रयोविंशतितमः ।
अभिधानोत्तरोत्तरे वज्रसत्वोत्पत्तिपटल श्चतुर्विंशतितमः ।
अभिधानोत्तरे मञ्जुवज्रसाधनपटलः पंचविंशतितमः ।
अभिधानोत्तरोत्तरे चडाक वज्रसाधनपटलः पट्विंशतितमः ।
अभिधानोत्तरोत्तरे महारहस्ये आलिडाकस्यसाधनपटलः सप्तविंशतितमः ।
अभिधानोत्तरोत्तरे प्रयवडाकसिद्धि निमित्त निर्देशपटलो नामाष्टाविंशतिमः ।
अभिधानोत्तरोत्तरे समयसम्वरोद्भवे महामण्डलराजोनाम उनत्रिंशः पटलः ।
अभिधानोत्तरे धूतगुणोत्पत्तिपटल स्त्रिंशतितमः ।
अभिधानोत्तरोत्तरे वर्षापणविधिपटलएकत्रिंशः ।
अभिधानोत्तरोत्तरे विश्वरूपसाधनपटलो द्वात्रिंशत्तमः ।
अभिधानोत्तरोत्तरे कवचद्ध योगोत्पत्ति भावनापटल श्चतुस्त्रिंशतमः ।
अभिधानोत्तरोत्तरे छोमापटलःपश्चत्रिंशत्तमः ।
अभिधानोत्तरोत्तरे योगिनीलक्षणपटल षट्त्रिंशः ।
अभिधानोत्तरोत्तरे डाकिनीलक्षणपलः सप्तत्रिंशत्तमः ।
अभिधानोत्तरोत्तर लामालक्षणपटलो अष्टत्रिंशतमः ।
अभिधानोत्तरोत्तर छोम्मापटलः एकोनचत्वारिंशः ।
अभिधानोत्तरोत्तरे डाकिन्य मुद्रापटलः एकचत्वारिंशतमः ।
अभिधानोत्तरोत्तरे डाकिनी छोम्मलक्षणपटलो द्विचत्वारिंशतमः ।
अभिधानोत्तरोतरे दूतसौख्याम्वुपटलस्त्रिचत्वारिंशः ।
अभिधानोतरोतरे डाकिनी वीरकर्म्मप्रसर साधक योगिनीवीरहृदया द्वयपटलश्चतुः चत्वारिंशतिमः ।
अभिधानोतरोतरे पटप्रतिमाविधि प्रतिष्ठाधिवासनंनाम पश्चचत्वारिंशपटलः ।
अभिधानोतरोतरे मण्डलविधिःपटलः षट्चत्वारिंशतमः ।
अभिधानोतरोतरे गायत्र्यासन्ध्यापटल सप्तचत्वारिंशः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिधानोत्तरोत्तरे उपहृदय साधनोत्पत्ति भावना पटोलो अष्टचत्वारिंशः ।
अभिधानोत्तरोत्तरे द्वाविंशत्यक्षर हृदयोत्पत्ति भावना पटल एकोनपञ्चाशः ।
अभिधानोत्तरोत्तरे मण्डलविधि पटलः पञ्चाशः ।
अभिधानोत्तरोत्तरे धर्मधातुपुर भावना पटल एकपञ्चाशः ।
अभिधानोत्तरोत्तरे योगगुह्य भावना पटलो द्विपञ्चाशः ।
अभिधानोत्तरोत्तरे गुह्याक्षरोत्पत्ति साधन पटल स्त्रिपञ्चाशः ।
अभिधानोत्तरोत्तरे मूलमन्त्र खटिको द्वार पठलश्चतुः पञ्चाशः ।
अभिधानोत्तरोत्तरे कवच हृदय भावना पटलः पञ्चपञ्चाशः ।
इत्याभिधानोत्तरे हृदयमंत्रकवचोदेव्या हृदय भावना पटलः षट्पञ्चाशः ।
इत्यभिधानोत्तरे रक्षा चतुर्मुखाधिष्ठानलिपिमाड़ल चतुः क्रोध वज्र हूँकारोत्पत्ति खटिको हाल पटलः सप्तपञ्चाशः ।
अभिधानोत्तरोत्तरे वर्ग योग पटलोऽ ष्टपञ्चाशः ।
इत्यभिधानोत्तरोत्तरे गर्दभाकार स्वेच्छासिद्धि नितिच पटल एकोनषष्ठिः ।
अभिधानोत्तरोत्तरे ज्ञानगुह्य पटलः षष्ठितमः ।
अभिधानोत्तरोत्तरे चतुः देव्य संपुट गुह्य पटल एकषष्ठितमः ।
अभिधानोत्तरोत्तरे वज्रभैरव क्रोधाधिपधि संपुटोदघाट पटलो द्वाषष्ठितमः ।
अभिधानोत्तरोत्तरे सप्तजन्म पशुसान पटल स्त्रिषष्ठितमः ।
अभिधानोत्तरोत्तरे स्वाधिष्ठान स्वधर्मोत्तरोत्यत्ति भावना पटल श्चतुः षष्ठितमः ।
अभिधानोत्तरोत्तरे आत्माभावपूजा पटलः पञ्चषष्ठितमः ।

अन्तिमवाक्यम्—

अथ भगवन्तः सर्व्वतथागत इदं ज्ञानगुह्य रहस्य मुदाजहार ।
निः स्वभावात्मका शर्मा आकाशमिव निर्म्मलं ।
शून्यता ज्ञानवज्रेण शून्यतात्यत विभावना ॥
साधुकारं ददर् तस्म तन्त्र निष्पत्ति योगतः ।
साधु साधु महाज्ञानं अभिधानोत्तरोत्तरं ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साधु वज्र नयं रौद्रं बुद्ध बोधिप्रसाधनम् ।
साधु अद्वययोग चतुरोत्तर साधनं ॥
साधु निश्चय योगञ्च निराकांक्ष विभावना ।
साधु सर्व जगन्नाथं महायानस्य देशकः ॥
संप्रदायं वर श्रेष्ठमद्वयज्ञान—मं ।
साधु वज्र गुरुः सर्व्व योगिन्यो तन्त्र देशकः ॥
साधु पर्षद चक्रेभ्यो सिद्धि दधृत्यनुत्तरमिति तूष्णी भवत् ॥
इदमवोचद्भगवान् वज्रसत्वस्ते च सर्व्वतथागत क्रोधराजा अभिधानोत्तरोत्तरे डाकडाकिनी जालसम्वरं ॥ ॥

अभिधानोत्तरतन्त्रम्

क्रमाङ्कः १७४ विषयाङ्कः ५

ग्रन्थकारः— । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ८ । आकारः १०×४½ । ग्रन्थसंख्या ४१४ । पत्रसंख्या २३ । अन्त्यखण्डितम् ।

अमृतप्रभा साधनोपायिका

क्रमाङ्कः २३२ विषयाङ्कः ६

ग्रन्थकारः– डोम्बीपादः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११×३ । ग्रन्थसंख्या ७० । पत्रसंख्या १०–१४ ।

आदिवाक्यम्—

नमः श्रीहेवज्राय

डोम्बी हेरुकपादेस्तु देवी चक्रस्य भावना कथिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सपिण्डा सकल तत्व हेवज्रयोगिनी तंत्रात् ॥
नभसि भट्टारक दृष्टवा गुरूकुलिशेश्वरं प्रभुं ।
पूजयद्वन्दयद्धीमान् अक्षोभ्य प्रतिविम्बकः ॥

अन्तिमसंवाद्यम्—

व्याघ्रासिन श्वरेद्यो विविध फणिवरै भूषितो यः क्षमावान् ।
राज्ञा संभोग हृष्ट विविध मधुयते कंकरो हायव्य नाग्नि ॥
तेनेन्द्रं साधनेन्द्रं परहित रूचिना गुह्य प्रज्ञाङ्ग सङ्ग ।
लोकार्थो भाषितङ्कश्चचित जिनसुता भाषितं जर्म्म मेदं ॥
अमृतप्रभानाम साधनोपायिका श्रीहेवज्रस्य समाप्ता ।
कृतिराचार्य्य श्रीडोम्बीवज्रपादानाम् ।

अरपचनचक्रसाधन विधिः

क्रमाङ्कः २३२ विषयाङ्कः ७

ग्रन्थकारः– । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११×३ । ग्रन्थसंख्या १३ । पत्रसंख्या १६–१७ ।
पुष्पिका—
अरपचनचक्र साधनविधिः समाप्तः ।

आचार्यक्रिया समुच्चयः

क्रमाङ्कः ६२ विषयाङ्कः ८

ग्रन्थकारः— जगद्दर्पणः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७.८ । आकारः १५×२३ । ग्रन्थसंख्ता ६०८० । पत्रसंख्या २१६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

नृत्यध्यानं प्रकुर्वन् मुरज मुखर वाहु तदेवैर्नतांघ्रि

भक्तं व्यारुक्त गात्र स्तदनु विसगणित स्थानकं न्यस्तपादः ।

भ्रू भङ्गोल्लखिनेत्रा नुग वलिन भुज व्यूह हस्ताङ्गुलीभि-

र्मुद्रा वन्ध प्रवृत्ति क्रम वलित मुखोहत्वथ हेरुको वः ॥

प्रायोजनः शोच्यतसोति दुःखी तृयां समालोकयितुं न शक्तः ।
अतस्तु संक्षिप्य विधिं विधास्ये विपद्धति पद्धतिमात्मशक्त्या ॥

कृतो न चाभिमानेत क्रिया समुच्चयो मया ।
क्षन्तव्य पण्डितैः सर्व्वैर्यदत्र पद दूषणं ॥
नानातन्त्रान्समाकृष्य नानाचार्य्य मतादपि ।
लिख्यते दर्प्पणेनेह समन्ता ध्येषणा वशात् ॥
प्रतिष्ठादि क्रियाः सर्वा वज्राचार्य्य पुरः सराः ।
तस्माल्लोक हितार्थाय तस्य लक्षणमुच्यते ॥

पुष्पिकावाक्यानि—

इति महामण्डलाचार्य्य जगद्दर्प्पण विरचिते क्रियासनुच्चये
आचार्य लक्षण विधिः ।
विहार दि करणार्थ भूमिपरीक्षाविधिः ।
इति वास्तुनागस्य परीक्षाविधिः
इति शल्योद्धारणविधिः ।
इति भूशल्य सूत्रपातन निमित्त विधिः ।
इति विहारचैत्य गन्धकूटा वसथाश्रम वर्घ विधि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्करिण्याद्यर्थं विधिः ।
इति सद्धर्म्महलिखनार्थं विधिः ।
इति जीर्णोद्धारस्य विधिः ।
इत्यर्घादि दानलक्षण विधिः ।
इति पूर्वसेवा नियमप्रयोजन विधिः ।
इति मण्डलगृहादि विधिः ।
इति विघ्नकीलन विधिः ।
कलशाधिवासन विधिः ।
देवताधिवासन विधिः ।
इति सूत्राधिवासन विधिः ।
इत्याकाश सूत्रपातन विधिः ।
इति खटिका सूत्रपातन विधिः ।
सर्वं मण्डलसाधारण विधिः ।
इति रंगजाप विधि ः ।
इति रजपातन विधिः ।
इति सपरिकार मण्डलसाधन विधिः ।
इति संक्षिप्तक्रमेण सर्वमण्डले देवतानांवर्ण्णचिन्हभुजमुखादि भावना विधिः ।
इति नीराजन विधि ः ।
इनि मकुटाभिषेक विधिः ।
इति विद्याप्रतिष्ठा विधिः ।
इति अक्षसूत्र प्रतिष्ठाः ।
इति संक्षिप्ताक्षसूत्र प्रतिष्ठा विधिः ।
इति नामाकर्षोऽक्षसूत्र विधिः ।
ध्वजारोपण प्रतिष्ठा विधिः ।
इति दीपलक्षण विधिः ।
इति पुष्करणी वापीकूपादि प्रतिष्ठा विधिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यारामादि प्रतिष्ठा विधिः ।
इति गुरुमण्डलः ।
इति पोषध विधिः
इति शिष्याधिवासनविधिः ।
इति चार्य्याप्रवेश विधिः ।
इति समयोदकदानम् ।
इति आवेश विधिः ।
इति मालाभिषेक विधिः ।
इति शिष्यप्रवेश विधिः ।
इति स्नानमण्डल विधिः।
इति समयदान विधिः ।
इत्यवैवर्त्तिकापेका परमाचार्याभिषेक विधिः ।
इति मन्त्रसमर्पण विधिः ।
इत्यञ्जन विधिः ।
इति दर्पण दर्शन विधिः ।
इति शरक्षेप विधिः ।
इति विद्यावृतदान विधिः ।
इति चर्यावृत दान विधिः ।
इति व्याकरण विधिः ।
इत्यनुज्ञादान विधिः ।
इति आश्वासदान विधिः ।
इति समय श्रावण विधिः ।
इति परस्याभिषेक विधिः ।
इति स्वस्याभिषेक विधिः ।
इति मूलापत्तिः ।
इति स्थूलापत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति कुण्ड विधिः ।
इति पात्रीश्रु वा विधिः ।
इति हव्यद्रव्य विधिः ।
इतीन्धन विधिः ।
इति साधक लक्षण विधिः ।
इत्यग्नि लक्षणविधिः ।
इत्यग्नि देवता सन्तर्पण विधिः ।
इति वाह्यदेवता सन्तर्पण होम विधिः ।
इति संघभोजन विधिः ।
इति सद्धर्म भोज्य विधिः ।
इति प्रतिभोज्य विधिः ।
इति संघ भोज्य विधिः ।
इति गणचक्र विधिः ।
इति मण्डलोपसंहार विधिः ।
इति सामाजिकःसार्वभौतिक बलिविधिः ।
इति साञ्चरिकःसार्वभौतिक बलिविधिः ।
इति हैवज्रिकः ,, ,,
इति सुबाहुपरिपृच्छा महातन्त्रोक्त बलिविधिः ।
इति ग्रहमातृका स्वस्त्ययन विधिः ।
इति वसु धारा पाठ धारणी ।
इत्युष्णीष विजया पाठविधिः ।
इति विघ्न निवारणः ।
इति दार्वादिगत शल्योद्धरणविधिः ।
इति चैत्य लक्षणविधिः ।
इति वज्र वज्रघण्ठा लक्षणादि विधिः ।
इत्यायुधलक्षण विधिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वनयात्राधिकारःसप्तमः ।
हस्तमान स्थापन विधिः ।
इति गण्डीलक्षण विधिः ।
इति वैरोचन धारणीमन्त्रेण चैत्यादौ यष्ट्यु त्थापनम्
इति द्वारोत्थापन विधिः ।
इति तम्भोत्थापन विधिः ।
इति विहारादौ शिरोदारुत्थापन विधिः ।
इति गन्धकुल्यादि लक्षण विधिः ।
इत ठिकरविधिः ।
इति वड्त्यादि लक्षण विधिः ।
चतुरागार ध्यानागारादि लक्षण विधिः ।
इति निवृत्तवज्राचार्यान्तेष्टिलक्षण विधिः ।

अन्तिमंवाक्यम्—

इत्याचार्यक्रिया यानि तमपि महासिद्धिहेतोः प्रयत्नात्
नानाग्रन्थागमादेर्वहुमृत कुसुमात्मम पीयूषरूपं ।
यत्कृत्वा जात पुण्यं जिनतनयमहाभूमि संभार हेतु
तेन त्रैलोक्य लोका लघु परम जिनानन्द शौध प्रयान्तु ॥
इत्याचार्य क्रियासमुच्चय समाप्तः ।
कृतिरियं ख्याख्यातृमहामण्डलाचार्य पण्डित वज्रभृत श्रीमज्जगद्दर्पणस्यति ॥
ग्रन्थप्रमाणमस्यानुष्टुपछन्दसा षट्सहस्राणि ६००० शुभमस्तु सर्वसत्वानामिति
॥ ॥ श्रीयोऽस्तु सम्वत् ७८३ कार्त्तिक कृष्ण सप्तम्यां तिथौ पुष्यनक्षत्र
शुक्लयोगे सुरगुरु दिने तुलेसूर्ये कर्कटराशिगते चन्द्रे मध्यपुरिनामदेशे श्रीप्रताप-
मल्लस्य विजयराज्ये मया कष्टेन लिखितं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आश्चर्ययोगमाला

क्रमाङ्कः ६१५६ विषयाङ्कः६

ग्रन्थकारः— श्रीश्वेताम्बरपण्डित गुणाकरः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ६×४ । ग्रन्थसंख्या १३४ । पत्रसंख्या १३ । अग्निदग्धम् ।

आदिवाक्यम्—

श्रीगणेशाय नमः

अथ वश्याधिकारः

सित भानु विटपमूलं मंजिष्ठा भवन चटक कुष्टम् ।
स्वा दत भवदिग्धै स्त्रिभुवनमेभिर्वशी कुरुते ॥

अन्तिमंवाक्यम्—

आश्चर्मयोगमाला नागार्जुन विरचितानुभव प्रसिद्धा ।
सकलजनहृदय दयिता समर्थिता सूत्रितो जयति ॥
आत्मस्मरणाय मया विक्रीता नागार्जुन प्रणितेयम् ।
आश्चर्य योगमाला अगू तव वृद्ध टीक वः॥ १३४ ॥
इति श्रीश्वेताम्बर पण्डित गुणाकर विरचिता आश्चर्य योगमाला
लघुवृत्ति — सम सम शुभम् ॥

सम्वत् १६०६ साल मिति प्रथमवैशाखवदि १४ पुस्तकं लिखितमिदम् ।

आचार्यक्रियासमुच्चयः

क्रमाङ्कः १४६ विषयाङ्कः १०

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थकारः– जगद्दर्पणः। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८।
आकार ६१/२ × ४१/२ । ग्रन्थसंख्या ६००० । पत्रसंख्या ३६१ । पूर्णः ।

समयः— सम्वत् ६८८ आषाढ़ शुक्लया पञ्चमी बृहस्पतिवार पुनु सको मूलछेया श्रीवज्राचार्य मुकुटानन्दन थ्वक्रियासमुच्चय सफुल चोयसिद्धयकागु दिन जुल शुभं ॥

आर्यताराभट्टारिका साधनोपायिका

क्रमाङ्कः ८६ विषयाङ्कः ११

ग्रन्थकारः । ताड़पत्राणि । नेवारी लिपिः । पङ्क्तयः६ ।
आकारः ११×२ ग्रन्थसंख्या ४७ ,पत्रसंख्या ३ ।पूर्णा ।

आदिवाक्यम्—

ॐनमः श्रीवज्रसत्वाय

वज्रसत्वं जगन्नाथं प्रणियत्य पुन पुनः ।
साधनोयायिकां वक्ष्ये वज्रसत्वोदयां सुभं ॥

तत्रार्यतत्वसङ्ग्रह महातन्त्र विधिना वज्रधातु महामण्डले लब्धसमयाधिकस्य योगिनः ॥ आर्यवज्रसत्वाराधन विधिः समुच्चीयते ॥

पुष्पिका—

आर्यताराभट्टारिकायासाधनो (पा) यैका समाप्तम्यमिति ।
समयः— सम्वत् ४४५ आषाढ़ शुक्ल पूर्णमास्यां ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्पातलक्षणं शान्तिश्च

कृमाङ्कः २८२ विषयाङ्कः १२

ग्रन्थाकारः– । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः । ७ । आकारः ८×४ । ग्रन्थसंख्या १९६ । पत्रसंख्या १४ ।

आदिवाक्यम—

श्रीमत्पोतलके रम्ये नानावृक्ष संमाकुले ।
नानाद्विज मृगा कीर्णे सदेवाः ऋषया गृतः ॥
तारेह य त्रिवक्रोधेः लोकनाथस्य पार्षदि ।
उवाच तारणीदेव्या सत्वानां हित चेतसा ॥
उत्पात कथ्यते भगवन् लोकार्थं हित काम्यया ।

अन्तिमं वाक्यम्—

रात्रौ महारात्रि पूर्वकं गणचक्र भंगस्थाने कारयेत् एतेन शान्ति भवति नान्यथा ॥ ॥ इति उत्पातलक्षण लोकेश्वर भाषितं ताराप्रृच्छा समाप्तम् ।

उष्णीषविजयधारिणी

कृमाङ्कः ३० विषयाङ्कः १३

गृन्थकारः– । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तय ५ । आकारः १३×२½ । गृन्थसंख्या ३० । पत्रसंख्या ३ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उष्णीष विजय धारिणी

क्रमाङ्क २६६ विषयाङ्कः १४

ग्रन्थकारः—। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः ८×२३/४। ग्रन्थसंख्या २६। पत्रसंख्या २।

आदिवाक्यम्—

ॐ नमः श्री भगवत्ये आर्योष्णीषविजयायै

एवम्मया श्रुतमेकस्मिन्समये भगवान् सुखावत्यां धर्मसंगीति महागुह्य प्रासादे भगवान् विहरतिस्म।

अन्तिमं वाक्यम्—

आर्य्योष्णीष विजयानाम धारणी परि समाप्ता।

एकल्लवीरतन्त्रम् चण्डमहारोषण क्रमोदयस्तोत्रं च

क्रमाङ्क १७५ विषयाङ्कः १५

ग्रन्थकारः— नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः १०×४१/४। ग्रन्थसंख्या ८०५। पत्रसंख्या ६७ पूर्णम्।

आदिवाक्यम्

ॐ नमः श्री चण्डमहारोषणाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं मयाश्रुतमेकस्मिन्समये भगवान् वज्रसत्व सर्वतथागतः कायवाक्चित्तवज्रधात्वीश्वरीभगे विजहारः ॥ अनेकैश्च वज्रयोगिनीगणैः ॥ तद्यथा ॥

पुष्पिकावाक्यानि—

इति एकल्लवीराख्ये चण्डमहारोषणतन्त्रे तन्त्रावतारण पटलः प्रथमः ।

इतिएकल्लवीराख्ये चण्ड़महादोषणातन्त्रे पटलो द्वितीयः ।

" " अभिषेक पटल तृतीयः ।

" " देवता पटलश्चतुर्थः ।

" " मन्त्र पलट पञ्चमः ।

" " निष्पन्नयोग पटलः षष्ठमः ।

" " देहप्रीणन पटलः सप्तमः ।

" " स्वरूप पटलोऽष्टमः ।

" " ध्यान पटलो नवमः ।

" " स्त्रीप्रसंशा पटलो दशमः ।

" " विश्वरूप पटलो एकादशः ।

" " सर्वमन्त्रकल्प पटलो द्वादशः ।

" " चर्या पटलस्त्रयोदशः ।

" " अचलान्वय पटल श्चतुर्दशः ।

" " विशुद्धि पटलः पंचदशमः ।

" " प्रतीत्यसमुत्पाद पटलः षोडशः ।

" " शुक्लादिवृद्धि पटलः सप्तदशः ।

" " व्याधिवृद्धत्वहानिपटलोऽष्टादशमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

" " शुक्रस्तम्भादि पटल उनविंशतितमः।
" " नानाभेद निगदित यन्त्र मन्त्रपटलो विंशतितमः।
" " कुतूहल पटल एकविंशतितमः।
" " वायुयोग पटलो द्वाविंशतितमः।
" " मृत्युलक्षण पटल स्त्रयोविंशतितमः।
" " देहस्वरूप पटल श्चतुर्विंशतितमः।
" " देवतासाधन पटलः पंचविंशतितमः।

इति एकल्लवीरनाम श्रीचण्डमहारोषणतन्त्रं समाप्तम्।

एकल्लवीरतन्त्रम्

क्रमाङ्कः १७२ विषयाङ्कः १५

ग्रन्थकारः——। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ५। आकारः १०३/४×३। ग्रन्थसंख्या ६०५। पत्रसंख्या १००। पूर्णम्। सम्वत् ६७४ श्रावन शुक्ल प्रतिपदा मघानक्षत्र परिघ योग सिंहराशि वृहस्पतिवार सएत्र राशि कुन्हु संपूर्णमिति।

एकल्लवीरतन्त्रम

क्रमाङ्कः १७० विषयाङ्कः १६

ग्रन्थकारः——। ताड़पत्राणि। नेवारी लिपिः। पङ्क्तय— ५। आकारः १०×२। ग्रन्थसंख्या ६७०। पत्रसंख्या ३७। अपूर्णम्।.... राजाधिराज परमेश्वरश्रीश्रीजयेन्द्रसिंह देवस्य विजयराज्ये॥ ॥श्रेयोऽस्तुसम्व—— भाद्र पद कृष्ण अष्टम्यां तिथौ रोहिणिनक्षेत्रे वज्रयोगे सोमवासरे लिखितं सपूर्णमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्पसङ्ग्रहः
(तारार्णवतन्त्रोद्धृतः)

कूमाङ्कः २२७ विषयाङ्कः १७

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । ६ ।
आकारः १० × ३ । ग्रन्थसंख्य १०४५ । पत्रसंख्या ६८ ।

आदिवाक्यम्—

नमस्तारायै:

नष्टौ गते चान्तर्हिते च तन्त्रे तारोद्भवे योग महा समुद्रे ।
तारार्णवो नाम महाधितन्त्रो नष्टे च तस्मिन् पुनरेष कल्पः ।।
उद्धृत्य तन्त्रेषु च विस्तरेषु योगां प्रयोगान् वहु सत्व हेतोः ।
लोकेश्वरः कल्पमिदं वभाषे शृण्वन्तु सर्वे किल वोधिसत्वाः ।।

पुष्पिका वाक्यानि—

कुरुकुल्लायाः पटावतारणकल्पः प्रथमः ।
,, अभिसमकल्पो द्वितीयः ।
इति वोधिचित्तकल्पस्तृतीयः ।
कुरुकुल्लायाश्चतुर्थः कल्पः ।
,, निदानकल्पः षष्ठः ।
,, रसायनकल्पः समाप्तः ।
भगवत्यर्यतारायाः कुरुकुल्लाकल्पः समाप्त ।
मारीच्या भगवत्याः कल्पः समाप्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मायामारीच्युद्भवात्तन्त्राद्विनिर्गतः कल्पराजोयं सम्यग्वै ोचना भाषितो यथालब्धः समप्त ।

अन्तवाक्यम्—

इन्द्रनील प्रभाकारां सुमंगला नवमि ज्वलन्ति विलन्ति विकट द्रंष्ट्रा भ्रकुटी कटाक्षे पिड्यन्नगेन्द्रा वामेकरे स्फुरद्वज्र

अतःपरं खण्डितम् ।

कल्पसंग्रहः (तारार्णवतन्त्रोंद्धृतः)

क्रमाङ्कः २२४ विषयाङ्कः १८

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १२ × ३ । ग्रंथसंख्या २१ । पत्र संख्या २ । अपूर्णम् ।

कल्पसंग्रहः (तारार्णव तंत्रोंद्धृतः)

क्रमाङ्कः २३१ विषयाङ्क १६

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपि ः । पङ्क्तय ५ । आकारः १० × ३ । ग्रन्थसंख्या ४२० । पत्रसंख्या ३१ ।

समयः—शुभ सम्वत् ६४८ फागुण शुक्ल पंञ्चमी अश्विनिनक्षत्रे सुकर्मयोगे वुद्धवासरे संपूर्णमिति ॥ ॥ लिखितं कान्तिपुरी नगरे राजकिर्त्तिमहाविहारे वस्थित वज्राचार्य सिद्धानन्देन लिखापिता ॥ यदि शुद्धमशुद्धं वा शोधनीय महागुणैः ॥ ॥ शुभ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालचक्रतन्त्रम्

क्रमाङ्कः ७२३६ विषयाङ्क २०

ग्रन्थकारः——। नेपलीयं कागतम् । रञ्जनालिपिश्च नेवारी लिपि च। पङ्क्तयः ७। आकारः १२ × ३। ग्रन्थसंख्या ३५०। पत्रसंख्या १६। प्रकीर्णम्।

कालचक्रम्

क्रमाङ्कः ७२३५ विषयाङ्कः २१

ग्रन्थकारः——। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ५। आकारः । ग्रन्थसंख्या ६६। पत्रसंख्या ८। अपूर्णम्।

द्वितीयपत्रे आरम्भवाक्यम्—

खलु लोक वाक्यं नानाविधो दर्शनधर्म्मभेदः। वेदोऽप्रतर्कः स्मृतयो विभिन्ना गृण्हन्तु किं साधुजनोऽत्रलोके ॥

अन्तवाक्यम्—

अनन्तकल्पानि विनष्टसौख्याः

अतः परं खण्डितम्।

कालचक्रानुसारिगणितम्

क्रमाङ्कः १५२ विषयाङ्कः २२

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थकारः——। ताड़पत्राणि । प्राचीननैवारी लिपिः । पङ्क्तयः ७। आकारः १२×२१/२ । ग्रन्थसंख्या २८० । पत्रसंख्या १६ । मूषकदष्टम् ।

आदिवाक्यम्—

नमो बुद्धाय

शकाब्दाः १०६१ म्लेच्छ.......... शुद्धवर्षाणि ३६४ अशुद्धमासगणः ४३६८ शुद्धमासगणः ४५०२

अन्तिमवाक्यम्—

मण्डलं प्रविश्य तिष्ठति । तदा— समानवारिता तस्या—— भवन्ति ॥ ॥

कुरुकुल्लासाधनम्

क्रमाङ्कः २३२

विषयाङ्कः २३

ग्रन्थकारः——। नेपालीयं कागजम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११×३ । ग्रन्थसंख्या ३६ । पत्रसंख्या १४–१५ ।

आदिवाक्यम्—

नमो भगवत्यै आर्य्यकुरुकुल्लायै
यथा स्मरणमात्रेण सदेवासुरमानुषान् ।
ध्रुवं किङ्करता यान्ति तान्न (म) स्यामि तारणी ॥

अन्तिमवाक्यम्—

तत्र प्रभृति जन्मजरामरणरहितः सिद्धो लोकधातु भगत्वा तथागतां पश्यति । भूमि धारण्यादिकं प्राप्नोति ॥

पुष्पिका— कुरुकुल्लासाधनं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णयमारीतन्त्रम्

क्रमाङ्कः ५ विषयाङ्कः २४

ग्रन्थकारः——। नेपालीयं काजम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः ११३/४×३१/२ । ग्रन्संख्या ५६० । पत्रसंख्या ३५ ।

आदिवाक्यम्—

ॐ नमः श्री कृष्णयमारये

एवं मया श्रुतमेकस्मिन् समये भगवान् सर्वतथागतः कायवाकचित्तसर्ववज्र-योषिद्भगेषु विजहार ।

पुष्पिकावाक्यानि—

इतिकृष्ण यमरीमहातन्त्रेऽसमयपटलः प्रथमः ।

" " मण्डलपटलो द्वितीयः ।
" " कर्म्मयोगपटलस्तृतीयः ।
" " कायवांक्चित्तस्तम्भनपटलश्चतुर्थः ।
" " चक्रानुपूर्वलिखमंनाम पटलः पंचमः ।
" " चक्रावलोकनोनामपटलः षष्ठमः ।
" " आकर्षणप्रयोगपटलः सप्तमः ।
" ; होमपटलोऽष्टमः ।
" " भीमोनाम पटलः नवमः ।
" " वेतालसाधन पटलः दशमः ।
" " चर्य्यासमयसाधनपटलरेकादशमः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,,   ,,   सर्वापायिकविशेषपटलः द्वादशः ।
,,   ,,   सिद्धिनिर्णयपटलः त्रयोदशमः ।
,,   ,,   मञ्जुवज्रसाधनपटल श्चतुर्दशमः । (चतुर्दशः)
,,   ,,   वज्रानङ्गसाधनपटलः पञ्चदशमः । (पञ्चदशः)
,,   ,,   हेरूकसाधनपटलः षोडशमः । (षोडशः)
,,   ,,   वोधिचित्तनिगदनपटलः सप्तदशमः । (सप्तदशः)
,,   ,,   कायवाक्चित्तकथा पटलोऽष्टादशमः । (अष्टादशः)

अन्तिमवाक्यम्--

इदमवोचत्महागुह्यकाधिपतिर्वज्रकुलप्रणेता नरकूवलस्य संपन्तता महा तन्त्रराज ओडियानविनिर्ग्गतः सपादलक्षादुद्धृतः समाप्तः ।

येधर्म्महेतु प्रभवा हेतुस्तेषां तथागतः ।
ह्यवदत्तेषां यो निरोध एवं वादी महाश्रमणः ॥

समयः— श्रीमन्नैपालिके वर्षे वाणविशिखनन्दने ।
मासे चैत्रशिते पक्षे पूर्ण्णमाश्यां शुभे दिने ॥
श्रीविश्वानन्दनामेयं यमारितन्त्र लेखयेत् ।
तदा यथा भवद्भव्यमस्त्विदानिं (नीं) जगच्छुभम् ॥

कृष्णयमारीतन्त्रटीका

क्रमाङ्कः २   विषयाङ्कः : २५

ग्रन्थकारः---- । नेपालीयं कागजम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १५$\frac{1}{2}$×३$\frac{1}{2}$ । ग्रन्थसंख्या ५८० । पत्रसंख्या २६ । सप्तमपटलान्तंपूर्णा ।

आदिवाक्यम्—

ॐ नमः श्रीवज्रसत्वाय ॥ ॐ नमः श्रीकृष्णयमारये ॥
श्रीमद्यमद्विषमशेषगुणप्रसूतिं सम्वर्त्तकालनव नीलकान्ति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षडङ्गत्रयो न्कुलिशखड्गधरं सकर्त्तिश्चक्राब्जकर्परभृत्मनसा नमामि एवमयेत्यादि सर्वप्रवचनानामादिवाक्यंगीतिकृत्तु रनुवादं भगवता हि परिनिर्वाणावस्थायो मुक्तमसातत्वात्कृतं यथाभूतदर्शनश्चात् युष्माकं देशनाया अनाधिकाराणु।

पुष्पिकावाक्यानि—

इति कृष्णयमारितन्त्रयोगमहाअभिसमयपटलः प्रथमः ।
इति श्रीकृष्णयमारितन्त्रे ग्रन्थसमूहः पटलः द्वितीयः ।
इति श्रीकृष्णयमारितन्त्रराजे कर्मयोगपटल तृतीयः ।
इति कृष्णयमारीयन्त्रयोगमहात्म्येवाश्र स्तम्भनपटलश्चतुर्थः ।
इति श्रीकृष्णयमारितन्त्रमहायोगमहात्म्येऽभिमतार्थपरिच्छेदः पञ्चमः पटलः ।
इति श्रीकृष्णयमारितन्त्रयोगमहात्म्येक सस्यचक्रामेण निश्चायते षष्ठः पटलः ।
इति श्रीकृष्णयमारियन्त्रम हात्म्ये ऽभिचारपटलः सप्तमः ।

अन्तवाक्यम्—

तथा शौष्टिकस्तम्भनायोः पीतकुसुमातिघतताताक्तानि । तथा मारणे कण्ठक धुत्तूर विष

अतः परं खण्डितम् ।

क्रियासङ्ग्रहःपञ्जिका

क्रमाङ्कः १४८ विषयाङ्कः २५

ग्रन्थकारः— कुलदत्तः । नेपालीयं कागजम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १३×३½ । ग्रन्थसंख्या १३८४ । पत्रसंख्या १६८ मध्यैकपत्रखण्डित मू।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

ॐ नमःश्रीवज्रसत्वाय

महागमात्सदाम्नायात्सच्छिष्याध्येषणावशात् ।
वज्रसत्वं जगन्नाथं नत्वेयं क्रियते मया ।।

पुष्पिका वाक्यम्—

इति महापण्डित कुलदत्तविरचितायां पञ्जिकायां प्रथमं प्रकरणं ।
इति महापण्डित कुलदत्त विरचितायां पञ्जिकायां द्वितीयं प्रकरणं ।

" " तृतीयं प्रकरणं ।
" " चतुर्थं प्रकरणं ।
" " पञ्चमं प्रकरणं ।
" " षष्ठ प्रकरणं ।
सप्तम प्रकरणं

इति महापण्डित— चार्य श्रीकुलदत्तविरचितातायां क्रियासंङ्ग्रहनाम पञ्जिकाऽष्टमप्रकरणं समाप्त भू ।।
श्रेयोऽस्तु संवत् ८३५ फाल्गुणकृष्ण ४ श्रीभास्करदेव संस्कारित श्रीकान्तिपुरी

महानरे पारावतमहाविहारे श्री ३ मारिचीदेव्या चरणसेवितमहातकुलवज्राचार्य श्रीचक्रपतिदेवेन लिखापितं ।। मू ।। शुभमङ्गलं भवंतु ।।

क्रियासंग्रहपञ्जिका

कृमाङ्कः १४६ विषयाङ्कः २६

ग्रन्थकारः— कुलदत्तः । नेपालीयं कागजम् । नेवारी लिपिः । पङ्क्तयः ७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकारः १५×४ । ग्रन्थसंख्या ८०० । पत्रसंख्या ३५ । तृतीयपटलान्तम् ।

खसमतन्त्रटीका (खसमा)

क्रमाङ्कः १०८

विषयाङ्कः २७

ग्रन्थकारः— रत्नाकरः शान्तिपादः । नेपालीतं कागजम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १२¼×५ । ग्रन्थसंख्या ५६० । पत्रसंख्का १८ ।

आदिवाक्यम्—

ॐ नमो वागीश्वराय

कायैस्त्रिभिरपि खसमं परमाद्यं प्रणमता तदर्थस्य । तन्त्रस्य मया क्रियते टीको खसमस्य खसमैव ॥

इह वज्रधरो भगवान्सर्वबुद्धानां बोधिः । सा चाश्रयपुरावृत्तिलक्षणा । आश्रयः शरीरं स तेषां त्रिविधः । तत्र चित्तसन्तानलक्षणस्याश्रयस्य यावत्सांक्लेशिक धर्मबीजानां तद्वासनानां दौष्ठुल्याख्यानामाधारस्तावदालयाख्यस्य पश्चादार्य मार्गेण निष्प्रपञ्चेन चिरभावितेन तासां परिक्षयादनालयाख्यस्य सतः प्रतिष्टा देह भोगनिर्भाशानां विज्ञप्तीनामितरेषां च सांक्लेशिकानां धर्माणामुत्पन्नानामस्तंगमादनुत्पन्नानां चात्यन्तमनुत्पादात्तेनात्मना निवृत्तिनियमः । विशुद्धगगनोपमे न तु निष्प्रपञ्चे न प्रकाशात्मनाऽनन्तेन प्रवृत्तिनियमः ।

पुष्पिका वाक्यानि—

खसमायां खसमतन्त्रस्य प्रथमः पटलः ।
खसमायां खममतन्त्रस्य टीकायां चित्तमण्डलः पटलो द्वितीयः ।
खसमायां खसमतवन्त्रस्य टीकायां वाङ्मण्डलपटलस्तृतीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खसमायां खसमतन्त्रस्य टीकायां कायमण्डलःपटल श्चतुर्थः।

खसमानां खसमतन्त्रस्य टीकायां पञ्चमः पटलः।

अन्तिमवाक्यम्—

श्रीमत्तन्त्रं खसमनया यन्मयाभ्यच्यंबाधा
प्राप्तं पुण्यं परिणतशरच्चन्द्रिकाचारूकान्ति।
तेनाक्षेपं खसममसमंबूम्ह जैनं बूजेयं
विश्वार्थाय प्रभवति गुणज्योतिषां यत्र योगः।

समाप्ता चेयं खसमानामा टीका॥ कृतिरियं महापण्डितश्रीरत्नाकरशान्तिपादानाम्।

गणपतिहृदयधारिणी

क्रमाङ्कः ३०　　　　विषयाङ्कः २८

ग्रन्थकार——। नेपालीयं कागजम् नेवारी लिपिः पङ्क्तयः ५। आकारः १३×२½। ग्रन्थसंख्या २१। पत्रसंख्या २। पूर्णा।

गणपतिहृदयधरिणी

क्रमाङ्कः २६६　　　　विषयाङ्कः २६

ग्रन्थकारः———। नेपालयं कागजम्। नेवागी लिपिः पङ्क्तयः ६। ७। आकार. ८×½। ग्रन्थसंख्या २२ पत्रसंख्या २। पूर्णम्।

आदिवाक्यम्—

ॐनमः श्रीभगवत्यै आर्य्यगणपतिहृदयाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवम्मयाश्रुतमेकस्मिन्समये भगवान् राजगृहे विहरतिस्म ॥

अन्तिमंवाक्यम्—

इदमवोचत् भगवानात्मना स्तेच भिचव स्ते बोधिसत्वा सा च सर्वावती पर्षत्सदेवमानुषासुरगरुडगन्धर्वश्च लोको भगघतो भाषितमभ्यनन्दन्तीति ॥
आर्य गणपतिहृदयानामधारणी परि समाप्ता ॥ ॥ शुभमस्तु ॥

गणपतिहृदय धारिणी

क्रमाङ्कः ३०८ विषयाङ्कः ३०

ग्रन्थकारः——। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ४। ५। आकारः ११×२। ग्रन्थसंख्या १४। पत्रसंख्या २। अपूर्णा।

गुह्यसमाज तन्त्रराजः(पूर्वार्द्धः)

क्रमाङ्कः २४६ विषयाङ्कः ३१

ग्रन्थकारः——। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ६। आकारः १४×४। ग्रन्थसंख्या १७२८। पत्रसंख्या ६६।

आदिवाक्यम्—

ॐ नमोरत्नत्रयाय ॥ ॐनमः सर्वबुद्धबोधिसत्वेभ्यः ॥
विहरति कनकाद्रौ शाक्यसिंहो मुनीन्द्रो
परिमित सुर संघैः सेव्यमानो जनौघैः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुवलयदल नेत्रो लक्षणैर्युक्तगात्रः
सम्मभवधितटस्थः सर्वलोके हितस्थ ॥

द्वितीयपत्रे आदिवाक्यम्—

नमः श्रीकोलास्यायै

एवं मयाश्रुतमेकस्मिन्समये भगवान् सर्वतथागत कायवाक चित्त वज्रहृदय वज्रयोषिद्भगेषु विजहार ॥

पुष्पिकावाक्यानि—

इति श्रीसर्वतथागत कायवाक्चित्त रहस्याद्गुह्यसमाजे सर्वतथागत समाधिमण्डलाधिष्ठानः पटल प्रथमः ।

" " बोधिचित्त पटलों द्वितीयः ।
" " वज्रव्यूहोनामसमाधिपटलस्तृतीयः ।
" " सर्वतथागत चित्तमण्डलकथननाम चतुर्कः पटलः ।
" " कायवाक्चित्ताधिष्ठानंनाम षष्ठः पटलः ।
" " मन्त्रचर्याग्रनाम सप्तम पटलः ।
" " चित्तसमयनामाष्टमः पटल ।
" " प्ररमार्थ शुद्धतत्वार्थ समयोनाम नवमःपठलः ।
" " हृदयसंचोदनोनाम दशमः पटलः ।
" " सर्वतथागत मन्त्र समयतत्त्व विद्या पुरुषोत्तमनाम एकादशः पटलः ।
" " सर्ववज्रयोगसमयसाधनाग्र निर्देशनाम द्वादशः पटलः ।
" " सर्वसमय वज्रव्यूह तत्वार्थ भावना सम्बोधियटलस्त्रयोदशः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,, ,' कायवाक्चित्ताद्भुत मन्त्राकर्षणविजृम्भितराजोनामसमाधि श्चतुर्दशः पटलः ।

,, ,, सर्वचित्तसमयसार वज्रसंभूतिर्नाम पंचदशः पटलः ।

,, ,, सर्वसिद्धिमण्डल वज्राभिसम्बोधिर्नाम षोडशः पटलः ।

,, सर्वतथागत समयसम्बर वज्राधिष्ठानवज्रोनाम सप्तदशः पटलः ।

,, ,, सर्वगुह्यनिर्देशवज्रज्ञानाधिष्ठानोनामाष्टादशः पटलः ।

श्रीगुह्यसमाजतन्त्रराजस्य पूर्वार्द्धं कायः समाप्तः ।

गुह्यसमाज तन्त्रराजः (उत्तरार्द्धः)

विषयाङ्कः ३२

क्रमाङ्कः २४७

ग्रन्थकारः——। नेपालीयं कागतम्। नेवारी लिपिः । पङ्क्तयः ६। आकारः १४×४। ग्रन्थसंख्या २६४६। पत्रसंख्या १४७।

आदिवाक्यम्—

नमः श्रीवज्रसत्वाय

एवं मया श्रुतमेकस्मिन्समये भगवान् सर्वतथागत कायवाकचित्त वज्रयोषिद्भगेषु विजहार ॥

पुष्पिकावाक्यानि—

इति श्रीसर्वतथागत कायवाक्चित्त वज्र हस्यातिरहस्ये गुह्यसमाजे तन्त्रराजे परार्द्धे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिधानाभिधेय बोधिचित्तोत्पादादि भावनादि तत्वप्रकरणंनाम प्रथमः पटलः।
इति श्री० बोधिचित्तावतारंनाम द्वितीयः पटलः।

,, तत्वोद्देशनाम तृतीयः पटलः
,, संपुटोद्भव कल्पराजः चतुर्थः पटलः।
,, बोधिचित्ताभिषेकोनाम पंचमः पटलः।
,, प्रज्ञोपायार्थभावना षष्ठः पटलः।
,, द्वितीकस्य तृतीयप्रकरणंनाम सप्तमः पटलः।
,, सर्वतन्त्र निदान रहस्यंनामाष्टमः पटलः।
,, हेरूकोत्पत्तिर्नाम नवमः पटलः।
,, संपुटोद्भव कल्पराजंनाम नवमः पटलः
,, कटपूतनी चिन्हमुद्रानाम दशमः पटकः।
,, चिन्हमुद्रा प्रकरणंनामैकादश पटलः।
,, डाकिनीसंकेतनाम द्वादशः पटलः।
,, स्कन्धायतन विशुद्धिर्नाम द्वादश पटलः।
,, चर्यालिंगनंनाम त्रयोदशः पटलः।
,, संपुटोद्भव चर्यानाम चतुर्दशः पटलः।
,, ज्येष्ठस्य प्रथमं प्रकरणंनाम पंचदशः पटलः।
,, षष्ठस्य तृतीयप्रकरणं षोड़शः पटलः
,, वसन्ततिलकंनाम सप्तदशः पटलः।
,, सर्वज्ञानोदयोनामाष्टादशः पटलः।
,, होमनोविधिर्नामोनविंशति पटलः।
,, सर्वकर्मं प्रसर चक्रोदयोनाम विंशतितमः पटलः।
,, सर्वकर्मसाधानंनाम एकविंशतितमः पटलः।
,, इति मन्त्रजाप भावनानाम द्वाविंशतितमः पटलः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,, तीर्थिकज्ञानापनयनंनाम त्रयोविंशतितमः पटलः ।

,, सर्वक्रियासमुदयंनाम चतुर्विंशतितम पटलः ।

इति सर्वतथागतोत्पत्तिर्नाम पंचविंशतितमपटलः ।

इति वल्युपहारोनाम षड्विंशतितमपटलः ।

इति पटपुस्तक निर्णयंनाम षड्विशतितमपटलः ।

इति चतुष्क्रियातत्वंनाम सप्तविंशतितमपटलः ।

इति आचार्यमहासाधनंनामाष्टाविंशतितमपटलः ।

इति महासुखसिद्धिः पूजासत्कारोनाम ऊनत्रिंशत्तमतमपटलः ।

इति बुद्धमायाविकुर्तिं नाम त्रिंशत्तमपटलः ।

,, सर्वतन्त्रनिदानमहाकल्पराजंनामैकत्रिंशत्तमः पटलः ।

,, सर्वकल्पनिदानतिलकं नाम समाप्तम् ॥

समाप्तोऽयं गुह्यसमाजोनाम तन्त्रराजः ॥ ॥

गुह्यसमाजतन्त्रराजः (पूर्वार्द्धः)

क्रमाङ्कः २४८ विषयाङ्कः ३३

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपिः पङ्क्तयः ५ । आकारः १४×३ ग्रन्थसंख्या ३५० पत्रसंख्यका २० । अन्त्यखण्डितम्

गुह्यसिद्धिः

क्रमाङ्कः ४५ विषयाङ्कः ३४

ग्रन्थकारः—— । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकारः १२×५ । ग्रन्थसंख्या ६०० । पत्रसंख्या १४ । अपूर्णम् ।

आदिरहितम्—

अन्तवाक्यम्—

वद्ध चेतसः । प्राप्नुवन्ति न ते सत्वा स्तत्पदं सिद्धिदम्पदम् ॥
अन्येऽपि चात्र दृश्यन्ते पर्युपास्य गुरून् दृढम् । प्रणाम पूजासत्कारैर्यथावत्प्राप्त
समीहितम् ॥

अन्तिमं वाक्यम्—

पञ्चैतानि परित्यज्य कृत बुद्ध श्च निश्चयः ।
सिद्ध्यते जन्मनीहैव उन्मत्त वृत लीलया ॥

पुष्पिकावाक्यानि—

इति परमार्थस्त्यचरतन्त्रसद्भावोद्धृतायांश्रीगुह्यसिद्धि वज्रसत्वासाधनवृततत्व निर्देशोनामः परिच्छेदः ।

,, ,, विजहारपदनिवृत्तिनिर्देशोनाम द्वितीयः परिच्छेदः ।

,, ,, अभिसंवोधि निर्देशोनाम तृतीयः परिच्छेदः ।

,, ,, पञ्चाकाराभिसंवोधि निर्देशोनाम चतुर्थः परिच्छेदः ।

,, ,, साधकमहामुद्रा भिषेकंन्नाम पञ्चमः परिच्छेदः ।

,, ,, साधकसमता चितोन्निर्म्मलीकरण गुह्यचर्य्या सकलविभागक्रम निर्देशंनाम षष्ठः परिच्छेदः ।

,, ,, विद्यावृतनिर्देशोन्नाम सप्तमः परिच्छेदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,, ,, गणोद्धृतनिर्देशोनामाष्टमः परिच्छेदः ।
,, ,, परमार्थाचार्य्यं पूजादेशनाम नवमः परिच्छेदः ।
इति सकलतन्त्रसद्भावसंचोदनीश्रीगुह्यसिद्धिः परि समाप्ता ।

गुह्यावलिः

क्रमाङ्कः ४७ विषयाङ्कः ३५

ग्रन्थकारः– दौड़ीपादः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः १०×७½ । ग्रन्थसंख्या ५० । पत्रसंख्या ११--१५ । आदिरहितः ।

आदिवाक्यम्--

कृत पुण्य राशि वपूषाः (पुषः) प्रादेशिकास्ते क्वचित् । मुद्राकुन्दुरू निस्तरङ्ग मनसः सिद्धास्तुस्तेभ्यो नमः ॥१॥

अन्तिमंवाक्यम्—

तत्रात्र श्रवन (ण) मात्र न मेऽस्तु तावज्ज्ञान (ने) न मे पद पदार्थ कथा (:)सुधीराः । मञ्ज्वङ्घ्रि पङ्कज रज (:) प्रणयादि यञ्चेद्गुह्यावली स्फुरति तत्किमहं करोमि ॥ ॥
इति दौड़ीपादीय गुह्यावली समाप्ता ।

गुह्यसमाजः

विषयाङ्कः ३६

क्रमाङ्कः २४७

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थकारः———। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः २१½×५½ । ग्रन्थसंख्य १८६३ पत्रसंख्या ६६ ।

आदिवाक्यम्—

ॐ नमोरत्नत्रयाय ।। ॐ नमःसर्वबुद्धवोधिसत्त्वेभ्यः ।।
विहरति कनकाद्रौ शाक्यसिंहौ मुनीन्द्रो परिमित सुरसंघैः सेध्यमानो जनौघैः ।
कुवलय दलनेत्रो लक्षणैर्युक्त गात्रः
स्मभवधितटस्थः सर्वलोके हितस्थः ।।
ये देवाः संति मेरौ वर कनकमये मन्दिरे ये च यक्षाः
पाताले ये भुजंगा स्फणिमणि किरणा ध्वस्तसर्वान्धकाराः ।
कैलाशे स्त्री विलाशैः प्रमुदित हृदया येच विद्याधरेन्द्रा-
स्ते मोक्षद्वारभूतं मुनिवरवचनं श्रोतुमायांति सर्वे ।।
आयांताः श्रोतुकामा असुरसुरनराः सिद्धगंधर्वनागाः
कुभाष्माण्डाः किन्नरेन्द्रा गडरुहरि हराः शक्रब्रह्मादिदेवाः ।
पूजा पंचोपचारै स्त्रिभुवन नमितं मेदिनी दुर्ल्लभं यत्
भक्तयाहं वाचयामि प्रणमित शिरसा तन्महायानसूत्रम् ।।

नमोंबुद्धाय ।। नमो धर्माय ।। नमः संघाय ।।
नमः श्रीकोल्लास्यायै

एवं मया श्रुतमेकस्मिन्समये भगवान्सर्वतथागत कायवाक्चित्त वज्रहृदय वज्रयोषिद्भगेषु विजहार ।। अनभिलाप्यानभिलाप्यैः सर्वबुद्धक्षेत्रसुमेरूपरमाणुरजःसमै वोधिसत्त्वैर्म-हासत्त्वैः ।। तद्यथा ।।

पुष्पिकावाक्यानि—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति श्रीसर्वतथागत कायवाक्चित्तरहस्याद्गुह्यसमाजे सर्वतथागत समाधिमण्डलाधि-
ष्ठान पटलः प्रथमः ।

" " बोधिचित्तपटलो द्वितीयः ।

" " वज्रव्यूहोनामसमाधिपटलस्तृतीयः ।

" " महागुह्यतन्त्रराजे सर्वतथागत चित्तमण्डलकथनं नाम चतुर्थः पटलः ।

इति श्रीसर्वतथागतकायवाक्चित्तरहस्यद्गुह्यसमाजे महागुह्यतन्त्रराजे समन्तचर्याग्र
नाम पंचमः पटलः ।

इति श्रीसर्बतथागत कायवाक्चित्त रहस्यातिरहस्ये गुह्य समाजे तन्त्रराजे कायवाक्
चित्ता धिष्ठानं षष्ठः पटलः ।

इति सर्वतथागतकायवाक्चित्तरहस्ये गुह्यसमाजे तन्त्रराजे मन्त्रचर्याग्र नाम सप्तमः
पटलः ।

इति सर्वतयागतकायवाक्चित्तरहस्यद्गुह्यसमाजे तन्त्रराजे चित्त समयं नामाऽष्टमः
पटलः ।

इति सर्वतथागयकायवाक्चित्त रहस्याद्गुयसमाजे परमार्थशुद्ध तत्वार्थ समयो नाम
नवमः पटलः ।

ग्रहमातृकाधारिणी

विषयाङ्कः ३७

क्रमाङ्कः २९८

ग्रन्थकारः——— । नेपालीयं कागतम् । नेवारी लिपिः । षड्क्तयः ५ । आकारः
$8\frac{1}{2} \times 2\frac{1}{2}$ । ग्रन्थसंख्य १३० । पत्रसंख्या १५ । पूर्णा ।

आदिवाक्यम् —

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ नमोभगवत्यै आर्य्यग्रहमातृकायै

एवं मयाश्रुतमेकस्मिन्समये भगवान् अलकवत्यां महानगर्य्यामनेकदेवनागयक्ष गन्धर्व्वासुरगरूड़किन्नरमहोरगाप्सरा.दैत्यसोमांगारबुधबृहस्पतिशुक्रशनिश्चरराहुकेतु भिरष्टाविंशति नक्षत्रादिभिः स्तूयमानो महावज्र समयालंकारव्यूहाधिष्ठानाधिष्ठिते सिंहासने विहरतिस्म ।

अन्तिमं वाक्यम् —

इदमवोचत् भगवानात्मनास्ते च भिक्षवस्ते च बोधिसत्वा महासत्वा च सर्वावती पर्षत्सदेवमानुषासुरलोकोभगवतो भाषितमभ्यनन्दनिति ॥ ॥ आर्य्य ग्रहमातृकानाम धारिणी समाप्ता ॥ ॥

ग्रहमातृकाधारिणी

क्रमाङ्कः २६८ | विषयाङ्कः ३८

ग्रन्थकारः———— । नेपालीयं कागतम् ।नेवारी लिपिः । पङ्क्तयः ७ । आकारः ८×२½ । ग्रन्थसंख्या २१ । पत्रसंख्या २ । पूर्णा ।

ग्रहमाकातृधारिणी

क्रमाङ्कः २६६ | विषयाङ्कः ३६

ग्रन्थकारः——— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः ८½×३ । ग्रन्थसंख्या ८० । पत्रसंख्या २०—२७ । अन्त्यरहिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहमातृकाधारिणी

क्रमाङ्कः २९ विषयाङ्कः ४०

ग्रन्थकारः---- । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १३×२½ । ग्रन्थसंख्या ११५ । पत्रसंख्या ८ । पूर्णा ।

ग्रहमातृकाधारिणी

क्रमाङ्कः ३० विषयाङ्कः ४१

ग्रन्थकारः---- । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तय ५ आकारः १३×२½ । ग्रन्थसंख्या ११५ । पत्रसंख्या ११ । पूर्णा । संवत् ७५५ ।

ग्रहमातृकाधारिणी

ग्रन्थकारः----- । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १२×२½ । ग्रन्थसंख्या ११५ । पत्रसंख्या ३०--४० । मध्यखण्डिता ।

ग्रहमातृकाधारिणी
(सचित्रा)

क्रमाङ्कः ३०७ विषयाङ्कः ४२

ग्रन्थकारः--- । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ५ आकारः ११×२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थसंख्या ८० । पत्रसंख्या ७ । प्रकीर्णा ।

ग्रहमातृकधारिणी

क्रमाङ्कः ८५५४

विषयाङ्कः ४३

ग्रन्थकारः——— । नेपालीयं कागतम् । नेवारी लिपि । पङ्क्तयः ५ । ६ । आकारः ८×२¼ । ग्रन्थसंख्या ११५ । पत्रसंख्या १३ । अपूर्णा ।

चक्रसम्वरपूजाविधिः

क्रमाङ्कः २१७

विषयाङ्क ४४

ग्रन्थकारः—— कलहंसकुमारपादः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ७×२½ । ग्रन्थसंख्या ५० । पत्रसंख्या ४८-२२ ।

आदिवाक्यतम्—

नमः श्रीचक्रसम्वराय

नत्वा श्रीसम्वरंवीरं भवसम समवोध सिद्धये तस्य ।
श्रीकलहंसनाथो मङ्गलपुजाविधिः क्रियते ॥

अन्तिमं वाकयम्—

पुजाविधि गुरु परम्परयागतं यच्छ्रीचक्रसम्वरमहाप्रभुमण्डलस्य । कृत्वा मया कुशलमाप्तमतोऽस्तु लोक स्तं मण्डल प्रणयन्संस्पर्श सत्सुख श्रीः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतिरियं पण्डिताचार्य श्रीकलहंसकुमारपादानाम् ॥ शुभम्भूयात् ।

चक्रशम्बरतन्त्रपञ्जिका

क्रमाङ्कः २१२ विषयाङ्कः ४५

ग्रन्थकारः— जयभद्रः । ताडपत्राणि । प्राचीननेवाराक्षरः । पङ्क्तयः ५ । आकारः ८×२½ । ग्रन्थसंख्या ७०० । पत्रसंख्या ६८ । पूर्णा ।

आदिवाक्यम्—

ॐ नमोबुद्धाय

सर्व्वभाव स्वभावाग्रं सर्व्वभाव भयापहं ।
सर्व्वभाव निराभासं सर्व्वभाव विभाविनं ॥
तं प्रणम्य महावीरं खसमार्थं ख निर्म्मलं ।
चक्रसम्बर तन्त्रस्य लिख्यते पञ्जिका मया ॥

अन्तिमवाक्यम्—

अनेन पुण्येन भवे भवेयं त्रिचक्रवीराधिमतं समानः ।
जनस्तथा तेन च सर्व पापाद्विमुक्त एवास्तु सदा समस्तः ॥
कृतिरियमिह योयस्य शीलं कान्जम भूरभूतस्य ।
जयभद्राख्यः ख्यातः शान्तिं कुर्वन्तु वीरडाकिन्यः ॥
प्रख्यान्ते श्रीमहाविम्बे सौगतानां समाश्रये ।
चैत्यकर्म्म वराधारे प्रातिहार्य निरन्तरे ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्रे अग्रबोधौ विबुधाधिप कीर्तिहेतौ ताराभवने स्थितवति प्रवरे विहारे। ग्रन्थः स यष रचित स्तुति साधने च तन्मण्डलोपकरणं च सुविस्तरञ्च येत् ॥ ॥ कृतिरियमोर्यं जयभद्रस्य। समाप्तेयं श्रीचक्रसम्बर पञ्जिका ॥ ॥

ये धर्म्मा हेतु प्रभवा हेतु स्तेषां तथागतो
ह्यवदत्तेषाञ्च यो निरोध एवं वादी महाश्रमवणः ॥

देयं धर्मोयं प्रवर महायान यायिनः शाक्यभिक्षु गगन श्रीज्ञानस्य यदत्र पुण्य तद्भवत्वाचार्योपाध्याय मातापितृ ।

चक्रशम्वर प्रयोगः

क्रमाङ्कः २२६

विषयाङ्कः ४६

ग्रथकारः—— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ६×३ । ग्रन्थसंख्या २०० । पत्रसंख्या १८ । अपूर्णः ।

आदिव.क्यतम्—

ॐ नमः श्रीचक्रसम्वराय

समन्वाहरतुमा बुद्धा अशेषा दिक्षु संस्थिता ॥

अन्तिमं वाक्यम्—

ॐ तत्वं महारागं रक्तं महाद्वेषदुष्टं महामोहमूढं महालोभलुब्धं कृपाशून्यता भिन्नपूर्वी परान्त द्वयत्यक्त लोकत्रयंक चण्ड्यापि विज्ञानमा- विर्भवत् श्रीमहानन्द सदोह सत्सुन्दरं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दानशीलादि सं : अतः परं खण्डितम् ।

चक्रसम्वराभिशमथः

क्रमाङ्कः २३२ विषयाङ्क ४७

ग्रन्थकारः— लूयीपादः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११×३ । ग्रन्थसंख्या १२६ । पत्रसंख्या ६ ।

आदिवाक्यम्—

नमः श्रीवज्रडाकाय

प्रथमन्तावद्योगेश्वरेण चतुर्व्यूहविहारीणा भाव्यम् ॥

अन्तिमवाक्यम्—

नाना तुर्य निर्घोषे नान गीतोपहारतः ।
मन्युर्न्नाम ।विकल्पोऽयं नीयते खचरी पदे ॥
श्रीचक्रशम्बरभिसमयः समाप्तमिति ।
कृतिरयं महायोगेश्वर लूयीपादानां ॥

चक्रसम्वराभिसमयः

क्रमाङ्कः २३५ विषयाङ्कः ४८

ग्रन्थकारः— लूयीपादः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ६ । आकारः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८×२½ । ग्रन्थसंख्या १६८ । पत्रसंख्या १४ । अन्त्यरहितः ।

चतुष्पीठनिबन्धः

क्रमाङ्कः ३७

विषया ४६

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः १० । आकारः १५×२½ । ग्रन्थसंख्या ६५० पत्रसंख्या ४७ । जीर्णः ।

आदिवाक्यम्—

ॐ नमः

एवमिति । सकल चतुष्पीठ तन्त्रार्थमशेषत, पर्यन्ते भाषितं । रिगीनामिति सर्वक्लेशादि रिक्तत्वात् रिगी वज्रधरः । सुन्दरी शति ।

पुष्पिकावाक्यानि—

इति पूर्वसेवाबोधन पटल समाप्तः ।

इति भूमि परिग्रह द्वितीय पटल समाप्तः ।

इति मण्डल पटलस्तृतीयः ।

इति पञ्चपञ्चिकक्रम सिद्देशः समाप्तः ।

इति चतुर्थपटल समाप्तः ।

प्रज्ञा वज्रावतारणयो समाप्तः ।

अन्तिमं वाक्यम्—

अथ सर्व्वाणि सारस्य संहिता श्रेष्ठमत्तमं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदरेण तु गृन्हीया या योगतन्त्रानुयायिना ॥
शुद्धभावेन भोक्तव्यं स्फटिकाकार चेतसा ।
सर्व्वलक्षण संयुक्तं शुद्ध भावेन भावितः ॥
अथ कल्पमकल्पम्वा भक्षाभक्ष समे न तु ।
अपेक्षा स्वेच्छ भुक्तन्तु संसार पारगामिनः ॥
पूर्व्वंदीक्षादि वीराणां तं सँगृह्य यत्नतः ।
क्रम क्रमेण मासानां दिन संवत्सरेण तु ॥
व्रत लक्षण चत्वार तङ्गुणं परि व च ।
अष्टम्याञ्च विशेषेण पौर्ण्णमास्यां चतुर्द्दशीम् ॥
वलिदातव्य यत्ते क्रम पश्चा व्रतमेव च ।
तस्य सर्व्वाणि कर्म्मा ॥
ये धर्म्मा हेतु प्रभावा हेतु तेषां तथागतो
ह्यवदत्त षाञ्च यो निरोध एवं वादी महाश्रमणः ॥

चतुष्पीठमण्डलोपायिकायाः चतुर्थपटल
मन्त्रोद्धार लक्षणस्य पञ्जिका

विषयाङ्क

क्रमाङ्कः ६०

ग्रन्थकारः— आर्यदेवपादः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १३ ।
आकारः १३—५ । ग्रन्थसंख्या २०० । पत्रसंख्या ६ । मध्येखण्डिताः ।

आदिवक्यम्—

ॐ नमः श्रीवज्रसत्वाय

डाकिनी पञ्चकं नत्वा शान्त्यादि कर्मसिद्धिदम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकानां कृमयां नित्यं पञ्चनाड़ीस्वरूपतः॥
चतुष्पीठ महातन्त्रादुद्धृत्य ज्ञानसागरात् ।
कृतं श्रीदेवपादेन मण्डलोपायिकामृतम् ॥
तस्य चतुर्थपटलंमन्त्रोद्धारस्य लक्षणम् ।
गुरूपाद प्रसादेन विज्ञातं पञ्जया शुभम् ॥

पुष्पिका—

इति चतुष्पीठमण्डलोपायिकायाश्चतुर्थपटलभापितमन्त्रोद्धारलक्षणस्य पञ्जिका समाप्ताः ।

समयः— श्रेयोऽस्तु सम्वत् श्रा चू ३ श्र– न शुक्ल प्रतिपदादित्यदिने ॥ श्रीमद्राजाधिराजपरमेश्वरः श्रीया(श्रा)नन्ददेवस्य महाविजयराज्ये लिखितमिति ॥ ॥ इत्यन्त लेखयुतात्प्राचीन नेवाराक्षर लिखिता त्प्राचीन ताडपत्रपुस्तकादुद्धृत्य १९८७ वैकृमाब्दे लिखितमिदंपुस्तकम् ॥ ॥

चतुष्पीठमहातन्त्रम्
(सचित्रम्)

कृमाङ्कः ३७ विषयाङ्कः ५१

ग्रन्थकारः—— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १५×२¾ । ग्रन्थसंख्या १२०० । पत्रसंख्या ७१ ।कीटकर्तितम् ।

आदिवाक्यतम्—

नमः श्रीवज्रसत्वाय

एवं भाषित सर्वज्ञ रिगीनां ज्ञानमीश्वरं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुद्धावासिकतस्थानं योगिनी जालसम्वरं ॥

पुष्पिकावाक्यानि—

इति प्रकरणं आत्मपीठ प्रपटलस्समाप्तः ।
इति प्रकरणे द्वितीयपटल समाप्तः ।
इति प्रकरणे शून्यतायोग स्तृतीयपटलासमाप्तः ।
इति प्रकरणे आत्मपीठ समाप्तः ।
इति परपीठ प्रथमपटलः समाप्तः ।
इति प्रकरणे द्वितीयपटलः समाप्तः ।
इति परपीठे तृतीय पटलस्समाप्तः ।
इति प्रकरणे परपीठे समाप्तः ।
इति प्रकरणे योगपीठे प्रथम पटलः ।
इति प्रकरण योगपठ द्वितीय पटलः समाप्तः ।
इति प्रकरणे योपीठ तृतीय पटलः समाप्तः ।
इयि प्रकरणे योगपीठ समाप्तः
इति प्रकरणे परपीठ गुह्यं पीठ प्रथम प्रकरण समाप्तः ।
इति प्रकरणे गुह्यपीठ द्वितीयपटलः समाप्तः ।
इति प्रकरणे गुह्यपीठ तृतीयपटलः समाप्तः ।

अन्तिमवाक्यम्—

इदमवोचद्भगवानात्तमना ते च सर्वे दशदिग्योगयोगिनांयं निपतिता तेन प्र वज्रपाणि प्रमुखा बोधिसत्वा महासत्वा सर्वे च देवनागयक्षासुरगरूड किन्नर महोरगा सर्वावतीपर्षद भगवतो भाषितमभ्यनन्दन्निति ॥
आर्य्य द्वादशसाहस्रिके ततूसंहृत्य द्वादशशतकस्य श्रीचतुः पीठ महातन्त्रराजेन्द्र समाप्तः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu
